नं० ७-६३-घ

भक्तिरसामृतसिन्धुः (सम्पूर्णम्)

नं० ७ ४३-घ

पत्राणि-६४+१=६६

भक्तिरसामृतसिंधुः ४६
२६८.

भ॰ र॰ स॰ १

ओंश्रीगणेशायनमः श्रीगुरुभ्योनमः ओंअखिलरसामृतमूर्त्तिः प्रसृम .... रुचिरुद्धतारकापालिः कलितश्या
मालालितोराधाप्रेयान्विधुर्जयति हृदियस्य प्रेरणयाप्रवर्त्तितोहंवराकरूपोपितस्यहरेः पदकमलंवन्देचैतन्य
देवस्य विश्राममन्दिरतयातस्यसनातनतनोर्मदीशस्यभक्तिरसामृतसिन्धुर्भवतुसदायंप्रमोदाय भक्तिरसा
मृतसिन्धौचरतःपरिभूतकालजालभियः भक्तमकरानशीलितमुक्तिनदीकान्नमस्यामि मीमांसकवडवा
ग्नेःकठिनामपिकुण्ठयन्नसौजिह्वाम् स्फुरतुसनातनसुचिरंतवभक्तिरसामृताम्भोधिः भक्तिरसस्यप्रस्तु
तिरखिलजगन्मंगलप्रसंगस्यअज्ञेनापिमयास्यक्रियतेसुहृदांप्रमोदाय एतस्यभगवद्भक्तिरसामृतपयो
निधेः चत्वारःखलुवक्ष्यन्तेभागाःपूर्वादयःक्रमात् तत्रपूर्वेविभागेस्मिन्भक्तिभेदनिरूपके अनुक्रमेणवक्त
व्यंलहरीणांचतुष्टयं आद्यासामान्यभक्त्याढ्याद्वितीयासाधनान्विता भावाश्रितातृतीयातुर्याप्रेमनिरू
पिका तत्रादौसुष्ठुवैशिष्ट्यमस्याःकथयितुंस्फुटम् लक्षणंक्रियतेभक्तेरुत्तमायाःसतांमतम् अन्याभिलाषिता
शून्यंज्ञानकर्माद्यनावृतं आनुकूल्येनकृष्णानुशीलनंभक्तिरुत्तमा यथानारदपंचरात्रे सर्वोपाधिविनिर्मुक्तं
तत्परत्वेननिर्मलम् हृषीकेणहृषीकेशसेवनंभक्तिरुच्यते भागवततृतीयस्कंधे अहैतुक्यव्यवहितायाभ
क्तिःपुरुषोत्तमे सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत दीयमानंनगृह्णन्तिविनामत्सेवनंजनाः सएवभा

ओं १

क्रियोगात्यआत्यन्तिक उदाहृत इति सालोक्येत्यादि यत्तत्सम्भक्त्योत्कर्षनिरूपणं भक्तेर्विशुद्धताव्यक्तिकालत्वेण
पर्यवस्यति क्लेशघ्नी शुभदा मोक्षलघुताकृत्सुदुर्लभा सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षणी च सा त
त्रास्याः क्लेशघ्नत्वं क्लेशाश्च पापं तद्बीजमविद्या चेति ते त्रिधा तत्र पापं अप्रारब्धं भवेत्पापं प्रारब्धं चेति त
द्विधा तत्राप्रारब्धहरत्वं यथैकादशस्कन्धे यथाग्निः सुसमिद्धार्चिः करोत्येधांसि भस्मसात् तथा मद्विषया
भक्तिरुद्धवैनांसि कृत्स्नशः प्रारब्धहरत्वं तृतीये यन्नामधेयश्रवणानुकीर्तनाद्यत्प्रह्वणाद्यत्स्मरणादपि
क्वचित् श्वादोऽपि सद्यः सवनाय कल्पते कुतः पुनस्ते भगवन्नु दर्शनादिति दुर्जातिरेव सवनायोग्यत्वे कार
णं मतम् दुर्जात्यारम्भकं पापं यत्स्यात्प्रारब्धमेव तत् पाद्मे च अप्रारब्धफलं पापं कूटं बीजं फलोन्मुखम्
क्रमेणैव प्रलीयते विष्णुभक्तिरतात्मनाम् बीजहरत्वं यथा षष्ठे तैस्तान्यघानि पूयन्ते तपोदानव्रतादिभिः
नाधर्मजं तद्धृदयं तदपीशाङ्घ्रिसेवया अविद्याहरत्वं च तत्रैव यत्पादपङ्कजपलाशविलासभक्त्या कर्माश
यं ग्रथितमुद्ग्रथयन्ति सन्तः तद्वन्न रिक्तमतयो यतयोऽनिरुद्धस्रोतोगणास्तम .... भज वासुदेवम् पा
द्मे च कृतानुयात्राविद्याभिर्हरिभक्तिरनुत्तमा अविद्यां निर्दहत्याशु दावज्वालेव पन्नगीम् शुभदत्वं शुभा
नि प्रीणनं सर्वजगताम ... रक्तता सद्गुणाः सुखमित्यादीन्याख्यातानि मनीषिभिः तत्र जगत्प्रीणनादिद्वय

भ०
र०सु०
२

त्वंपाद्मे येनार्चितोहरिस्तेनतर्पितानिजगन्त्यपिरज्यन्तिजन्तवस्तत्रस्थावराजंगमाअपि सद्गुणादिप्रदत्वं
पंचमे यस्यास्तिभक्तिर्भगवत्यकिंचनासर्वैर्गुणैस्तत्रसमासतेसुराः हरावभक्तस्यकुतोमहद्गुणामनोरथे
नासतिधावतोवहिः सुखदत्वे सुखंवैषयिकंब्राह्ममैश्वर्यंयेतितत्त्रिधा यथातन्त्रे सिद्धयःपरमाश्चर्याभक्ति
र्मुक्तिश्चशाश्वती नित्यंचपरमानन्दंभवेद्गोविन्दभक्तितः हरिभक्तिसुधोदयेच भूयोपियाचेदेवेशत्वयि
भक्तिर्दृढास्तुमे यामोक्षान्तचतुर्वर्गफलदासुखदालतेति मोक्षलघुताकृत मनागेवप्ररूढायांहृदये
भगवतौ पुरुषार्थास्तुचत्वारस्तृणायन्तेसमन्ततः नारदपंचरात्रे हरिभक्तिमहादेव्याःसर्वाभक्त्यादिसिद्ध
यः भक्त्यःश्चाद्भुतास्तस्याश्चेटिकावदनुव्रताइति साधनौघैरनासंगैरलभ्यासुचिरादपि हरिणाचाश्वदेये
तिद्विधासासुदुर्लभा तत्राद्यातन्त्रे ज्ञानतस्सुलभामुक्तिर्भुक्तिर्यज्ञादिपुण्यतः सेयंसाधनसाहस्रैर्ह
रिभक्तिःसुदुर्लभा द्वितीयापंचमे राजन्पतिर्गुरुरलंभवतांयदूनांदैवंप्रियःकुलपतिःक्वचकिंकरोवः अस्त्वे
वमंगभजतांभगवान्मुकुन्दोमुक्तिंददातिकर्हि चित्स्मनभक्तियोगमिति सान्द्रानन्दविशेषात्मा ब्रह्मानन्दो
भवेद्यदिचेत्परार्धगुणीकृतः नैतिभक्तिसुधाम्भोधेःपरमाणुतुलामपि यथाहरिभक्तिसुधोदये त्वत्साक्षात्
करणाह्लादविशुद्धाब्धिस्थितस्यमेसुखानिगोष्पदायन्तेब्राह्माण्यपिजगद्गुरो भावार्थदीपिकायांच त्वत्कथा

२

ष्टतपार्थायोविह्वलोमद्यामदः ऊर्द्ध्वास्तिकृतिनः केचिस्त्रवर्गेलक्षणायमम कृत्वाहरिंप्रेमभाजंप्रिय
वर्गसमन्वितं भक्तिर्वशीकरोतीतिश्रीकृष्णाकर्षिणीमता यथैकादशे नसाधयतिमांयोगोनसांख्यंध
र्मउद्धव नस्वाध्यायस्तपस्त्यागोयथाभक्तिर्ममोर्जिता सप्तमेनारदोक्तौ यूयंनृलोकेवतभूरिभागा
लोकंपुनानामुनयोभियन्ति येषांगृहानावसतीतिसाक्षाद्गूढंपरब्रह्ममनुष्यलिंगमिति अग्रतो
वक्ष्यमाणायास्त्रिधाभक्तेरनुक्रमात् द्विधात्रषड्भिःपदैरेतन्माहात्म्यंपरिकीर्तितम् किंच स्वल्पापि
रुचिरेवस्याद्भक्तितत्त्वावबोधिका युक्तिस्तुकेवलानैवयदस्याअप्रतिष्ठिता तथाप्राचीनैरप्युक्तम् य
त्नेनापादितोप्यर्थः कुशलैरनुमातृभिः अभियुक्ततरैरन्यैरन्यथैवोपपद्यते ॥ इतिश्रीभक्तिरसामृत
सिन्धौपूर्वविभागेभक्तिसामान्यलहरी ॥ साभक्तिःसाधनंभावःप्रेमाचेतित्रिधोदिता तत्रसाधनभ
क्तिः कृतिसाध्याभवेत्साध्यभावासासाधनाभिधा नित्यसिद्धस्यभावस्यप्राकट्यंहृदिसाध्यते साभक्ति
सप्तमस्कंधेभंग्यादेवर्षिणोदिता यथा तस्मात्केनाप्युपायेनमनःकृष्णेनिवेशयेदिति वैधीरागानुगा
चेतिसाद्विधासाधनाभिधेति तत्रवैधी यत्ररागानवाप्तत्वात्प्रवृत्तिरुपजायते शासनेनैवशास्त्रस्यसावैधी
भक्तिरुच्यते यथाद्वितीये तस्माद्भारतसर्वात्माभगवान्हरिरीश्वरः श्रोतव्यःकीर्तितव्यश्चस्मर्तव्यश्चेछ्छ।

ताऽभयम् पाद्मेच स्मर्तव्यःसततंविष्णुर्विस्मर्तव्योनजातुचित् सर्वेविधिनिषेधास्युरेतयोरेवकिंकराः इत्यस्यो
स्याहिविधिर्नित्यस्सर्ववर्णाश्रमादिषु नित्यत्वेप्यस्यनिर्णीतमेकादश्यादिवत्फलम् एकादशेव्यक्तमेवोक्तम् मु
खबाहूरुपादेभ्यःपुरुषस्याश्रमैःसह चत्वारोजज्ञिरेवर्णागुणैर्विप्रादयःपृथक् यएषांपुरुषंसाक्षादात्मप्र
भवमीश्वरम् नभजन्त्यवजानन्तिस्थानाद्भ्रष्टाःपतन्त्यधः तत्फलंचतत्रैव एवंक्रियायोगपथैःपुमान्वैदि
कतान्त्रिकैः अर्चन्नुभयतःसिद्धिंमत्तोविन्दत्यभीप्सितम् पांचरात्रेच सुरर्षेविहिताशास्त्रेहरिमुद्दिश्य
याक्रिया सैवभक्तिरितिप्रोक्तातयाभक्तिःपराभवेत् इति अत्राधिकारी यःकेनाप्यतिभाग्येनजातश्रद्धोस्य
सेवने नातिशक्तोनवैराग्यभागस्यादधिकार्यसौ यथैकादशे यदृच्छयामत्कथादौजातश्रद्धस्तुयःपु
मान् ननिर्विण्णोनातिसक्तोभक्तियोगोस्यसिद्धिदःइति उत्तमोमध्यमश्चस्यात्कनिष्ठश्चेतिसत्रिधा तत्रोत्तमः
शास्त्रेयुक्तौचनिपुणस्सर्वथादृढनिश्चयः प्रौढश्रद्धोधिकारीयस्सभक्तावुत्तमोमतः यःशास्त्रादिष्वनि
पुणःश्रद्धावान्सतुमध्यमः योभवेत्कोमलश्रद्धस्सकनिष्ठोनिगद्यते तत्रगीतादिषूक्तानांचतुर्णामधिका
रिणाम् मध्येयस्मिन्भगवतःकृपास्यात्तत्प्रियस्यवा सक्षीणतत्तद्भावस्स्याच्छुद्धभक्त्यधिकारवान् यथेभः
शौनकादिश्चध्रुवस्सचचतुस्सनः भक्तिर्मुक्तिस्पृहायावत्पिशाचीहृदिवर्तते तावद्भक्तिसुखस्यात्रकथ

मभ्युदयो भवेत् तत्रापि च विशेषेणागतिमावीमनि``तिः भक्तिः हृतमनःप्राणान्प्रेमणा तान्कुरुते जनान् तथा।
च तृतीये नेदर्शनीयावयवैरुदारविलासहासेक्षितवामसूक्तैः हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो मे गति
मावीं प्रयुंक्त इति श्रीकृष्णचरणाम्भोजसेवानिर्वृतचेतसाम् यथां``नायभक्तानां न कदापि स्पृहा भवेत् यथा
तत्रैवोद्धवोक्तौ कं त्वं शान्ते पादसरोजभाजां सुदुर्लभोऽर्थेषु चतुर्ष्वपीह तथापि नाहं प्रवृणोमि भूमन्भवत्पदाम्भोज।
निषेवणोत्सुकः तत्रैव श्रीकपिलदेवोक्तौ नैकात्मतां मे स्पृहयंति केचिन्मत्पादसेवाभिरता मदीहाः अन्योन्यतोभा
गताः प्रसज्य सभाजयन्ते मम पौरुषाणि सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत दीयमानं न गृह्णन्ति विना
मत्सेवनं जनाः चतुर्थे श्रीध्रुवोक्तौ या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् सा ब्र
ह्मणि स्वमहिमन्यपि नाथ मा भूत् किं त्वन्तकासिलुलितात्पततां विमानात् श्रीतत्रैव श्रीमदादिराजोक्तौ न का
मये नाथ तदप्यहं क्वचिन्न यत्र युष्मच्चरणाम्बुजासवः महत्तमान्तर्हृदयान्मुखच्युतो विधत्स्व कर्णायुतमेष
मे वरः पंचमे श्रीशुकोक्तौ यो दुस्त्यजान्क्षितिसुतस्वजनार्थदारान्प्रार्थ्यां श्रियं सुरवरैः सदयावलोकाम् नै।
च्छन्नृपस्तदुचितं महतां मधुद्विट्सेवानुरक्तमनसामभवोऽपि फल्गुः षष्ठे श्रीवृत्रोक्तौ न नाकपृष्ठं न च पारमे
ष्ठ्यं न सार्वभौमं न रसाधिपत्यम् न योगसिद्धीरपुनर्भवं वा समंजसत्वा विरहय्य कांक्षे तत्रैव श्रीरुद्रोक्तौ नाराय

भ० पं० स्तु० ध

णपराः सर्वे न कुतश्चन बिभ्यति स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः तत्रैवेन्द्रोक्तौ आराधनं भगवत ईहमाना
निराशिषः ये तु नेच्छन्त्यपि परं ते स्वार्थकुशलाः स्मृताः सप्तमे श्रीप्रह्लादोक्तौ तुष्टे च तत्र किमलभ्यमनन्त आ
द्ये किं तैर्गुणव्यतिकरादिह ये स्वसिद्धाः धर्मादयः किमगुणेन च कांक्षितेन सारं जुषां चरणयोरुपगायतां नः
तत्रैव शक्रोक्तौ प्रत्यानीताः परम भवता त्रायता नः स्वभागा दैत्याक्रान्तं हृदयकमलं त्वद्गृहं प्रत्यबोधि काल
ग्रस्तं कियदिदमहो नाथ शुश्रूषतां ते मुक्तिस्तेषां न हि बहुमता नारसिंहापरैः किम् अष्टमे गजेन्द्रोक्तौ एका
न्तिनो यस्य न कंचनार्थं वाञ्छन्ति ये वै भगवत्प्रपन्नाः अत्यद्भुतं तच्चरितं सुमंगलं गायन्त आनन्दसमुद्रमग्नाः नव
मे वैकुण्ठनाथोक्तौ मत्सेवया प्रतीतं ते सालोक्यादिचतुष्टयम् नेच्छन्ति सेवया पूर्णाः कुतोन्यत्कालविप्लुतं
दशमे नागपत्नीस्तुतौ न नाकपृष्ठं न च सार्वभौमं न पारमेष्ठ्यं न रसाधिपत्यं न योगसिद्धीरपुनर्भवं वा वाञ्छ
न्ति यत्पादरजःप्रपन्नाः तत्रैव वेदस्तुतौ दुरवगमात्मतत्त्वनिगमाय तवात्ततनोश्चरितमहामृताब्धिपरिवर्त
परिश्रमणाः न परिलषन्ति केचिदपवर्गमपीश्वर ते चरणरजो संगविसृष्टगृहाः एकादशे भगवदुक्तौ
न किंचित्साधवो धीरा भक्ता ह्येकान्तिनो मम वाञ्छन्त्यपि मया दत्तं कैवल्यमपुनर्भवम् न पारमेष्ठ्यं न महेन्द्र
धिष्ण्यं न सार्वभौमं न रसाधिपत्यं न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत् द्वादशे रुद्रोक्तौ ने

ध

वैकुण्ठत्याशिषः कापि ब्रह्मर्षिर्मोक्षमप्युत पराम्भक्तिं भगवति लब्धवान्पुरुषोऽव्यये पाद्मे कार्तिकमाहात्म्ये च
रं देव मोक्षं न मोक्षावधिं वा न चान्यं वृणोऽहं वरेशादपीह इदं ते वपुर्नाथ गोपालबालं सदा मे मनस्याविरास्तां
किमन्यैः कुवेरात्मजौ बद्धमूर्त्यैव यद्वत्त्वया मोचितौ भक्तिभाजौ कृतौ च तथा प्रेमभक्तिं स्वकां मे प्रयच्छ न मो
क्षे ग्रहो मेऽस्ति दामोदरेह हयशीर्षीयनारायणव्यूहस्तवे च न धर्मं काममर्थं वा मोक्षं वा वरदेश्वर प्रार्थये
तव पादाब्जे दास्यमेवाभिकामये तत्रैव पुनः पुनर्वरान्दित्सुर्विष्णुर्मुक्तिं न याचितः भक्तिरेव वृता येन प्र
ह्लादं तं नमाम्यहं यदृच्छया लब्धमपि विष्णोर्दाशरथेस्तु यः नैच्छन्मोक्षं विना दास्यं तस्मै हनुमते नमः अ
त एव प्रसिद्धं हनुमद्वचनं भवबन्धच्छिदे तस्मै स्पृहयामि न मुक्तये भवान्प्रभुरहं दास इति यत्र विलुप्यते श्री
नारदपंचरात्रे च धर्मार्थकाममोक्षेषु नेच्छा मम कदाचन त्वत्पादपंकजस्याधो दीयतां जीवितं मम मोक्ष
सालोक्यसारूप्यान्प्रार्थये न धराधर इच्छामि हि महाभाग कारुण्यं तव सुव्रत अत एव भागवते षष्ठे मु
क्तानामपि सिद्धानां नारायणपरायणः सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने प्रथमे च कुन्त्युक्तौ
तथा परमहंसानां मुनीनाममलात्मनाम् भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः तत्रैव सूतोक्तौ आ
त्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः अत्र त्याज्यतयैवोक्ता म

क्तिस्सर्वविद्यापि चेत् सालोक्यादिस्तथाप्यत्र भक्त्या नातिविकत्थ्यते सर्वैश्वर्यैर्नरामेयं प्रेमसेवोत्तरेत्यपि सालोक्या
दिर्हियातत्रनायासेवान्वषामता किंतुप्रेमैकमाधुर्यभुजएकान्तिनो हरौ नैवांगीकुर्वते जातु मुक्तिं पंचविधाम
पि अत्राप्येकान्तिनां श्रेष्ठा गोविन्दहृतमानसाः येषां श्रीशप्रसादोपि मनो हर्तुं न शक्नुयात् सिद्धान्ततस्त्वभेदेपि
श्रीशकृष्णस्वरूपयोः रसेनोत्कृष्यते कृष्णरूपमेषा रसस्थितिः किंच शास्त्रतः श्रूयते भक्तौ नृमात्रस्याधिका
रता सर्वाधिकारतां माघस्नानस्य ब्रुवता यतः दृष्टान्तिता वसिष्ठेन हरिभक्तिर्नृपं प्रति यथाग्निमे सर्वेधिका
रिणो द्विजवर हरिभक्तौ यथा नृप काशीखण्डे च अन्त्यजा अपि तद्राष्ट्रे शंखचक्रांकधारिणः संप्राप्य वैष्णवीं दीक्षां
दीक्षिता इव संबभुः अपिच अन्त्यजस्थानतो दोषभक्त्यंगानां प्रजायते न कर्मणामकारणादेष भक्तिर्धिकारिणां
निषिद्धाचारतो दैवात्प्रायश्चित्तं च नोचितम् इति वैष्णवशास्त्राणां रहस्यं तद्विदां मतः यथैकादशे स्वेस्वेधिका
रे या निष्ठा स गुणः परिकीर्तितः विपर्ययस्तु दोषः स्यादुभयोरेष निश्चयः प्रथमे त्यक्त्वा स्वधर्मं चरणाम्बुजं हरे
र्भजन्नपक्वोथ पतेत्ततो यदि तत्र क्व वाभद्रमभूदमुष्य किं को वार्थ आप्तोभजतां स्वधर्मतः एकादशे आज्ञायैवं
गुणान्दोषान्मयादिष्टानपि स्वकान् धर्मान्सन्त्यज्य यः सर्वान्मां भजेत्स च सत्तमः अत्रैव देवर्षिभूताप्तनृणां पितॄ
णां न किंकरो नायमृणी च राजन् सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परित्यज्य काः गीतासु सर्वधर्मान्प।

रित्यज्य मामेकं शरणं व्रज अहं त्वां सर्वपापेभ्यो मोचयिष्यामि मा शुचः अगस्त्यसंहितायां यथा विधिनिषेधौ
त्वमुक्तं नैवोपसर्पतः तथा न स्पृशतो रामोपासकं विधिपूर्वकम् एकादश्योपव स्वपादमूलं भजतः प्रिय॰
स्त्यक्तान्यभावस्य हरिः परेशः विकर्म यच्चोत्पतितं कथञ्चिद्धुनोति सर्वं हृदि सन्निविष्टः हरिभक्तिविलासे
स्याभक्तेरंगानि लक्षणः किंतु तानि प्रसिद्धानि निर्दिश्यन्ते यथामति तत्रांगलक्षणं आश्रितावान्तरानेक
भेदो केवलमेव वा एकं कर्मात्र विद्वद्भिरेकं भक्त्यंगमुच्यते अथांगानि गुरुपादाश्रयस्तस्मात्कृष्णदीक्षादि
शिक्षणम् विश्रम्भेण गुरोः सेवा साधुवर्त्मानुवर्तनम् सद्धर्मपृच्छा भोगादित्यागः कृष्णस्य हेतवे निवासो द्वा
रकादौ च गंगादेरपि सन्निधौ व्यवहारेषु सर्वेषु यावदर्थानुवर्तिता हरिवासरसम्मानो धात्र्यश्वत्थादिगौर
वे एषामत्र दशांगानां भवेत्प्रारम्भरूपता संगत्यागो विदूरेण भगवद्विमुखैर्जनैः १ शिष्याद्यननुबन्धित्वं
महारंभाद्यनुद्यमः ३ बहुग्रन्थकलाभ्यासव्याख्यावादविवर्जनम् ४ व्यवहारेऽप्यकार्पण्यं ५ शोकाद्यवश
वर्तिता ६ अन्यदेवानवज्ञा च ७ भूतानुद्वेगदायिता ८ सेवानामापराधानामुद्भवाभावकारिता ९ कृष्ण
तद्भक्तविद्वेषविनिन्दाद्यसहिष्णुता १० व्यतिरेकितयामीषां दशानां स्यादनुष्ठितिः अस्यास्तत्र प्रवेशाय द्वार
त्वेप्यंगविंशतेः त्रयं प्रधानमेवोक्तं गुरुपादाश्रयादिकम् धृतिर्वैष्णवचिह्नानां १ हरेर्नामाक्षरस्य च २ नि॰

भ०
र० सि०
६

र्थाल्यदेशं तस्याग्रे ताण्डवं ४ दण्डवन्नतिः ५ अभ्युत्थानं ६ अनुव्रज्या ७ गतिः स्थाने ८ परिक्रमः ९ अर्चनं १० परिच
र्या च ११ गीतं १२ संकीर्तनं १३ जपः १४ विज्ञप्तिः १५ स्तवपाठश्च १६ स्वादो नैवेद्य १७ पाद्ययोः १८ धूपमाल्यादिसौरभ्यं
श्रीमूर्तेः स्पृष्टिः २० ईक्षणं २१ आरात्रिकोत्सवादेश्च २२ श्रवणं तत्कृपेक्षणं २४ स्मृतिः २५ ध्यानं २६ सख्यं २७ आत्म
निवेदनम् २८ निजप्रियोप ‥ यणं ३० तदर्थेऽखिलचेष्टितं ३१ सर्वथा शरणापत्तिः ३२ तदीयानां च सेवनम् तदी
यास्तुलसी ३३ शास्त्रं ३४ मथुरा ३५ वैष्णवादयः ३६ यथावैभवसामग्रीसद्गोष्ठीभिर्महोत्सवाः ३७ ऊर्जादरो वि
शेषेण ३८ यात्रा जन्मदिनादिषु ३९ श्रद्धाविशेषतः प्रीतिः श्रीमूर्तेरंघ्रिसेवने ४० श्रीमद्भागवतार्थानामा
स्वादो रसिकैः सह ४१ सजातीयाशये स्निग्धे साधौ संगः स्वतो वरे ४२ नामसंकीर्तनं ४३ श्रीमन्मथुरामंडले
स्थितिः ४४ अंगानां पंचकस्यास्य पूर्वं विलिखितस्य च निखिलश्रैष्ठ्यबोधाय पुनरप्यत्र शंसनम् इति काय
हृषीकान्तःकरणानामुपासनाः चतुःषष्टिः पृथक् सांघातिकभेदात् क्रमादिमाः अथार्षानुमतेनैषामोदाह
रणमीर्यते तत्र गुरुपादाश्रयो यथा एकादशे तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् शाब्दे परे च निष्णातं
ब्रह्मण्युपशमाश्रयम् कृष्णदीक्षादिशिक्षणं यथा तत्रैव तत्र भागवतान्धर्मान् शिक्षेद्गुर्वात्मदैवतः अमाय
यानुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः विश्रम्भेण गुरोः सेवा यथा तत्रैव आचार्यं मां विजानीयान्नावमन्येत का

११

हरिवित् नमन्त्रदुघास्तयेत सर्वदेवमयोगुरुः साधुवर्मानुवर्तनं यथा स्कंदे समरगः श्रेयमांहेतुः पन्थासन्नाप
वर्जितः अनवामश्रमंहवैर्येन मन्तः प्रतस्थिरे ब्रह्मयामलेच श्रुतिस्मृतिपुराणादिपंचरात्रविधिंविना ऐका-
न्तिके हरेर्भक्तिरुत्पातायैव कल्पते इति भक्तिरैकान्तिकेवेर्यं मविचारात्मनीयते वक्तस्ततथानैवय॰॰॰प्रा
स्तीयतेत्युते सद्धर्मपृच्छा यथा नारदीये अविवादेवसवार्थामिभत्येषामभीप्सितः सद्धर्मस्यावबोधाय येषां
निर्बंहिनीमतिः हृत्स्नार्थभोगादित्यागो यथा पाद्मे हरिमुद्दिश्य भोग्यानि काले त्यक्तवतस्तव विष्णुलोकास्थित
मेयं दलोलासमुच्यतीत्युते द्वारकानिवासो यथा स्कान्दे संवत्सरं वा षण्मासान्मासं मासार्धमेव वा द्वारकावासि
नः सर्वे नरा नार्यश्चतुर्भुजाः आदिशाह्वेन पुरुषोत्तमवासश्च यथा ब्राह्मे अहो क्षेत्रस्य माहात्म्यं समन्तादृशयो
जनं दिविष्ठा यत्र पश्यन्ति सर्वानेव चतुर्भुजान् गंगानिवासो यथा प्रथमे यावैलसन्छ्रीतुलसीविमिश्रा-
कृष्णांघ्रिरेण्वभ्यधिकाम्बुनेत्री पुनाति लोकानुभयत्र सेशान् कस्तां॰॰॰सेवेत मरिष्यमाणः यावदर्थानुवर्तिता
यथा नारदीये यावता स्यात्स्वनिर्वाहः स्वीकुर्यात्तावदर्थवित् आधिक्ये न्यूनतायां च च्यवते परमार्थतः हरिवा
सरसम्मानो यथा ब्रह्मवैवर्ते सर्वपापप्रशमनं पुण्यमात्यन्तिकं यथा गोविन्दस्मरणान्नृणां यदेकादश्युपोषणम्
धात्र्यश्वत्थादिगौरवं स्कंदे अश्वत्थतुलसीधात्रीगोभूमीसुरवैष्णवाः पूजिताः प्रणताः ध्याताः क्षपयन्ति नृणामघ

ग्यम् अथ कुलविसर्जना ``त्यागः यथा कात्यायनीसंहितायां वरं हुतवहज्वालापंजरान्तर्व्यवस्थितिः न शौरिचि
न्ताविमुखजनसंवासवैशसम् विप्रबहुस्येव आलिंगनं वरं मन्ये व्यालव्याघ्रजलौकसाम् न संगः शल्ययुक्तानां
नानादेवैकसेविनाम् शिष्याद्यनुबन्धित्वत्यागं यथा पाद्मे शिष्यान्नैवानुबध्नीयाद्ग्रन्थान्नैवाभ्यसेद्बहून् नव्या
ख्यामुपयुञ्जीत नारंभानारभेत्क्वचित् व्यवहारेष्वकार्पण्यं यथा पाद्मे अलब्धे वा विनष्टे वा भक्ष्याच्छादनसाध
ने अविक्लवमतिर्भूत्वा हरिमेव धिया स्मरेत् शोकाद्यवशवर्तित्वं यथा तत्रैव शोकामर्षादिभिर्भावैराक्रान्तं यस्य
मानसं कथं तत्र मुकुन्दस्य स्फूर्तिसंभावना भवेत् अन्यदेवानवज्ञा यथा तत्रैव हरिरेव सदाराध्यः सर्वदेवेश्वरे
श्वरः इतरे ब्रह्मरुद्राद्या नावज्ञेयाः कथंचन भूतानुद्वेगदायित्वं यथा भारते पितेव पुत्रं करुणो नोद्वेजयते यो
जनं विशुद्ध हृषीकेशस्तूर्णं तस्य प्रसीदति सेवानामापराधवर्जनं यथा वाराहे ममार्चनापराधा ये कीर्त्यन्ते वसु
धे मया वैष्णवेन सदा ते तु वर्जनीयाः प्रयत्नतः पाद्मे सर्वापराधकृदपि मुच्यते हरिसंश्रयः हरेरप्यपराधान्
यः कुर्याद्द्विपदपांसनः नामाश्रयः कदाचित्स्यात्तरत्येव स नामतः नाम्नोऽपि सर्वसुहृदो ह्यपराधात्पतत्यधः
तन्निन्दाद्यसहिष्णुता यथा तत्रैव निन्दां भगवतः शृण्वंस्तत्परस्य जनस्य वा ततो नापैति यः सोऽपि यात्यधः सुकृ
ताच्च्युतः अथ वैष्णवचिह्नधृतिर्यथा पाद्मे ये कण्ठलग्नतुलसीनलिनाक्षमाला ये बाहुमूलपरिचिह्नितशंख

चक्राः ये वा ललाटफलके लसदूर्ध्वपुण्ड्रास्ते वैष्णवा भुवनमाशु पवित्रयन्ति नामाक्षरधृतिर्यथा स्कान्दे हरिना
माक्षरयुतं भाले गोपीमृदंकितम् तुलसीमालिकोरस्कं स्पृशेयुर्नैव यमोद्भटाः पाद्मे च कृष्णनामाक्षरैर्गात्रमं
कयेच्चन्दनादिना सलोकपावनो भूत्वा तत्सलोकमवाप्नुयात् निर्माल्यधृतिर्यथैकादशे त्वयोपभुक्तस्रग्गन्ध
वासोलंकारचर्चिताः उच्छिष्टभोजिनो दासास्तव मायां जयेमहि स्कान्दे च कृष्णोत्तीर्णं तु निर्माल्यं यस्यांगे स्पृ
शते मुने सर्वरोगैस्तथा पापैर्मुक्तो भवति नारद अग्रे ताण्डवं यथा द्वारकामाहात्म्ये यो नृत्यति प्रहृष्टात्मा भा
वैर्बहुभक्तितः स निर्दहति पापानि मन्वन्तरशतेष्वपि तथा नारदोक्तौ च नृत्यतां श्रीपतेरग्रे मालिकावा
दनेर्भृशम् उड्डीयन्ते शरीरस्थाः सर्वे पातकपक्षिणः दण्डवन्नतिर्यथा नारदीये एकोपि कृष्णाय कृतः प्रणा
मो दशाश्वमेधावभृथेन तुल्यः दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय अभ्युत्थानं यथा ब्र
ह्माण्डे यानारूढं पुरः प्रेक्ष्य समायान्तं जनार्दनम् अभ्युत्थानं नरः कुर्वन्पातयेत्सर्वकिल्बिषान् अनुव्र
ज्या यथा भविष्योत्तरे रथेन सह गच्छन्ति पार्श्वतः पृष्ठतोऽग्रतः विष्णुनैव समाः सर्वे भवन्ति श्वपदादयः स्थाने
गतिः स्थानं तीर्थं गृहं वास्य तत्र तीर्थे गतिर्यथा पुराणान्तरे संसारमरुकान्तारनिस्तारकरणक्षमौ श्लाघ्यौ
तावेव चरणौ यौ हरेस्तीर्थगामिनौ आलये यथा हरिभक्तिसुधोदये प्रविशन्नालयं विष्णोर्दर्शनार्थं सुभक्ति

भ॰
र॰ स्त॰
८
8

मान् नभूयः प्रविशेन्मातृकुक्षिकारागृहं सुधीः परिक्रमो यथा तत्रैव विष्णुप्रदक्षिणां कुर्वन्यस्तत्रावर्तते पुनः तदेवा-
वर्तनं तस्य पुनर्नावर्तते भवे स्कान्दे चातुर्मास्यमाहात्म्ये चतुर्थी रत्नमीभिस्तु जगत्सर्वं चराचरम् क्रान्तं भवति विप्रा-
श्च तत्तीर्थगमनादिकम् इति अथार्चनम् शुद्धिन्यासादिपूर्वांगकर्मनिर्वाहपूर्वकम् अर्चनं तूपचाराणां स्यान्मंत्रेणोप-
पादनम् तद्यथा श्रीदशमे स्वर्गापवर्गयोः पुंसां रसायां भुवि संपदाम् सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनम् वि-
ष्णुरहस्ये च श्रीविष्णोरर्चनं ये तु प्रकुर्वन्ति नरा भुवि ते यान्ति शाश्वतं विष्णोरानन्दं परमं पदमिति परिचर्या परि-
चर्या तु सेवोपकरणादिपरिष्क्रिया तथा प्रकीर्णकच्छत्र‥‥वादित्राद्यैरुपासना यथा नारदीये मुहूर्तं वा मुहूर्तार्धं
यस्तिष्ठेद्धरिमंदिरे स याति परमं स्थानं किमु शुश्रूषणे रतः चतुर्थे च यत्पादसेवाभिरुचिस्तपस्विनामशेषजन्मो-
पचितं मलं धियः सद्यः क्षिणोत्यन्वहमेधती सती यथा पदांगुष्ठविनिःसृता सरिदिति अंगानि विविधान्येव स्युः स्व-
ज्ञाय परिचर्ययोः ततानि लिखितान्यत्र ग्रन्थवाहुल्यभीतितः अथ गीतं यथा लैंगे ब्राह्मणो वासुदेवाख्यं गायमानो-
निशं परम् हरेः सालोक्यमाप्नोति रुद्रगानाधिको भवेदिति संकीर्तनं नामलीलागुणादीनामुच्चैर्भाषा तु कीर्तन-
म् तत्र नामकीर्तनं यथा विष्णुधर्मोत्तरे कृष्णेति मंगलं नाम यस्य वाचि प्रवर्तते भस्मीभवन्ति राजेन्द्र महापातक-
कोटयः लीलाकीर्तनं यथा प्रथमे सोऽहं प्रियस्य सुहृदः परदेवताया लीलाकथास्तव नृसिंह विरिंचिगीताः अञ्जः

स्तिर्मन्त्रशास्त्राणि विप्रमुक्तो दुर्गाणि तेपदयुगालयहंसमसंगः गुणसंकीर्तनं यथा प्रथमे इदं हि पुंसस्तपसः श्रुत
स्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः अविच्युतोर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनम् जपः मंत्र
स्य मृदुलघूच्चारो जप इत्यभिधीयते यथा पाद्मे कृष्णायनम इत्येष मंत्रः सर्वार्थसाधकः भक्तानां जपतां स्वपवर्गमो
क्षफलप्रदः विज्ञप्तिः यथा स्कान्दे हरिमुद्दिश्य यत्किंचित्कृतं विज्ञापनं गिरा मोक्षद्वारार्गलामोक्षस्तेनैव वि
हितस्तवेति संप्रार्थनात्मिका दैन्यबोधिका लालसामयी इत्यादिविविधा धीरैः कृष्णे विज्ञप्तिरीरिता तत्र संप्र
र्थनात्मिका यथा पाद्मे युवतीनां यथा यूनि यूनां च युवतौ यथा मनोभिरमते तद्वन्मनोभिरमतां त्वयि दैन्यबोधि
का यथा तत्रैव मत्तुल्यो नास्ति पापात्मा नापराधी न कश्चन परिहारेपि लज्जा मे किं ब्रुवे पुरुषोत्तम लालसाम
यी यथा श्रीनारदपंचरात्रे कदा गम्भीरया वाचा श्रिया युक्तो जगत्पते चामरव्यग्रहस्तं मामेवं कुर्वेति वक्ष्यसि
यथा वा कदाहं यमुनातीरे नामानि तव कीर्तयन् उद्बाष्पः पुंडरीकाक्ष रचयिष्यामि ताण्डवम् स्तवपाठः प्रो
क्तो मनीषिभिर्गीतास्तवराजादयः स्तवाः यथा स्कान्दे श्रीकृष्णस्तवरत्नौघैर्येषां जिह्वा त्वलंकृता नमस्या मुनि
सिद्धानां वन्दनीया दिवौकसाम् नारसिंहे च स्तोत्रैः स्तवैश्च देवाग्रे यः स्तौति मधुसूदनम् सर्वपापविनिर्मुक्तो वि
ष्णुलोकमवाप्नुयात् अथ नैवेद्यस्वादः यथा पाद्मे नैवेद्यमन्नं तुलसीविमिश्रं विशेषतः पादजलेन सिक्तम् यो

भ· र· सु· ४
९

स्नातिनित्यंशुरतोस्मरारेः प्राप्नोतियज्ञायुतकोटिपुण्यम्‌ पाद्यस्नादोयथातत्रैव नन्दानंनहवीर्येषांस्नाथायोनस्मरारेन
म्‌ तेपिमादौदकंपीत्वाप्रयान्तिपरमांगतिं अथधूपसौरभ्यम्‌ यथाभक्तिस्नयोदये आघ्राणांयइरेर्दत्तधूपोच्छिष्टस्या
सर्वतः तत्क्षव्यालदष्टानांतस्यकर्मविषापहम्‌ माल्यसौरभ्यंयथा तत्र प्रविष्टेनासिकारन्ध्रेहरेर्निर्माल्यसौरभे मा
ह्योविलयमायातिपापपंजरबंधनं अगस्त्यसंहितायांच आघ्राणंगंधपुष्पादेरर्चितस्यतपोधन विशुद्धिस्यादनंतस्य
घ्राणस्येहाभिधीयते अथश्रीमूर्तेस्पर्शनं यथाविष्णुधर्मोत्तरे स्पृष्ट्वाविष्णोरधिष्ठानंपवित्रयःश्रद्धयान्वितः पापब
न्धैर्विनिर्मुक्तोसर्वान्कामानवाप्नुयात्‌ १० अथश्रीमूर्ते[illegible]र्शनं यथावाराहे वृन्दावनेतुगोविन्दंयेपश्यंतिवसुन्धरे
नतेयमपुरंयान्तियान्तिपुण्यकृतांगतिं आरात्रिकदर्शने यथास्कान्दे कोटयोब्रह्महत्यानामगम्यागमकोटयः दह
त्यालोकमात्रेणविष्णोरारात्रिकोत्सवम्‌ उत्सवदर्शनंयथाभविष्योत्तरे रथस्थंयेनिरीक्षन्तेकौतुकेनापिकेश
वम्‌ देवतानांगणाःसर्वेभवन्तिश्वपचादयः आदिशब्देनपूजादर्शनंयथाआग्नेये पूजितंपूज्यमानंवायःपश्येद्भ
क्तितोहरिं श्रद्धयामोदमानस्तुसोपियोगफलंलभेत्‌ अथश्रवणम्‌ श्रवणंनामचरितगुणादीनांश्रुतिर्भवेत्‌
तत्रनामश्रवणंयथागारुडे संसारसर्पसन्दष्टनष्टचेष्टैकभेषजम्‌ कृष्णेतिवैष्णवंमंत्रंश्रुत्वामुक्तोभवेन्नरः चरित
श्रवणंयथाचतत्रैव तस्मिन्महन्मुखरितामधुभिच्चरित्रपीयूषशेषसरितःपरितःस्रवन्ति यायेपिबन्त्यवितृषो

त्वपगाग्रकर्णैस्तान्नस्पृशान्त्यशानम्भङ्गवशोकमोहाः गुणश्रवणं यथा द्वादशे यस्तूत्तमश्लोकगुणानुवादः प्र
स्तूयतेभीक्ष्णममंगलघ्नः तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेमलां भक्तिमभीप्समानः २३ अथ तद्रूपेक्षणं श्रीदश
मे तत्तेनुकम्पां सुसमीक्षमाणो भुंजान एवात्मकृतं विपाकम् हृद्वाग्वपुर्भिर्विदधन्नमस्ते जीवेत यो मुक्तिपदे स
दाय भक्तिः यथा कथञ्चित्तेबन्धो मनसः स्मृतिरुच्यते यथा विष्णुपुराणे स्मृते सकलकल्याणभाजनं यत्र जा
यते पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् यथा वा पाद्मे ॥ प्रयाणे चाप्रयाणे च यन्नाम स्मरतां नृणाम् सद्यो न
श्यंति पापौघो नमस्तस्मै चिदात्मने २४ ध्यानम् ध्यानं ʻʻ यद्गुणक्रीडासेवाद्येस्सुष्ठुचिन्तनम् तद्रूपध्यानं यथा
नारसिंहे भगवच्चरणद्वंद्वध्यानं निर्द्वंद्वमीरितम् पापिनोपि प्रसंगेन विहितं सुहितं परम् गुणध्यानं यथा
विष्णुधर्मोत्तरे ये कुर्वन्ति सदा भक्त्या गुणानुस्मरणं हरेः प्रक्षीणकलुषौघास्ते प्रविशन्ति हरेः पदम् क्रीडा
ध्यानं यथा पाद्मे सर्वमाधुर्यसाराणि सर्वाद्भुतमयानि च ध्यायन्हरेश्चरित्राणि ललितानि विमुच्यते सेवाद
नं यथा पुराणान्तरे मानसेनोपचारेण परिचर्य हरिं मुदा परे वाङ्मनसागम्यं तं साक्षात्प्रतिपेदिरे अथ दास्य
दास्यं कर्मार्पणं तस्य कैङ्कर्यमपि सर्वथा तत्राद्यं यथा स्कान्दे तस्मिन्समर्पितं कर्म स्वाभाविकमपीश्वरे भवे
द्भागवतं धर्मं तत्कर्म किमुतार्पितम् इति कर्म स्वाभाविकं भद्रं जपध्यानार्चनादि च इतीदं द्विविधं कृष्णे वैष्णवै

भ०
र० सु०
१०

दास्यमर्पितम्. सद्भ्यश्च दास्यकथितामल्पकर्माधिकारिता तदर्पितं ह्वैदास्यमिति कैश्चिदुदीयते द्वितीयं यथा ना
रदीये देहायस्य हरेर्दास्ये कर्मणा मनसा गिरा अखिलास्वप्यवस्थासु जीवन्मुक्तः स उच्यते विश्वासो मित्रवृत्तिश्च
सख्यं द्विविधमीरितम्. तत्राद्यं यथा श्रीमहाभारते प्रतिज्ञा तव गोविन्द न मे भक्तः प्रणश्यति इति संस्मृत्य संस्मृत्य
प्राणान्संधारयाम्यहम्. एकादशे च त्रिभुवनविभवहेतवेऽप्यकुण्ठस्मृतिरजितात्मसुरादिभिर्विमृग्यात्. न च
लति भगवत्पदारविन्दाल्लवनिमिषार्धमपि स वैष्णवाग्र्य इति श्रद्धामात्रस्य तद्भक्तावधिकारित्वहेतुता अंगत्व
मस्य विश्वासविशेषस्य तु केशवे द्वितीयं यथागस्त्यसंहितायां परिचर्यापराः केचित्प्रासादेषु च शेरते मनुष्यमिव
तं द्रष्टुं व्यवहर्तुं च बन्धुवदिति रागानुगांगतास्य स्याद्विधिमार्गानपेक्षणात्. मार्गद्वयेन चैतेन साध्या सख्यरतिर्म
ता अथात्मनिवेदनं यथैकादशे मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे तदामृतत्वं प्रति
पद्यमानो मयात्मभूयाय च कल्पते वै इति अर्थोऽयं हि आत्मशब्दस्य पंडितैरुपपादितो देहेऽहन्तास्पदं कैश्चिद्देहकः
श्चिन्ममत्वभाक्. तत्र देहे यथा यामुनाचार्यस्तोत्रे वपुरादिषु योऽपि कोऽपि वा गुणतोऽसानि यथा तथाविधः तद
यं तव पादपद्मयोरहमद्यैव मया समर्पितः देही यथा भक्तिविवेके चिन्तां कुर्यान्न रक्षायै विक्रीतस्य यथा पशोः
तथार्पयन्हरौ देहं विरमेदस्य रक्षणात्. डाम्बरत्वेन विरलेहेतदात्मनिवेदने केषांचिदेव धीराणां लभते साधना

ईतो अथ निजप्रियोत्सवहरणं यथैकादशे यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः तत्तन्निवेदयेन्मह्यं तदान
न्त्याय कल्पते अथ तदर्थेऽखिलचेष्टितं यथा पांचरात्रे लौकिकी वैदिकी वापि या क्रिया क्रियते मुने हरिसेवानु
कूलैव सा कार्या भक्तिमिच्छता इति अथ शरणापत्तिः यथा हरिभक्तिविलासे तवास्मीति वदन्वाचा तथैव मन
सा विदन् तत्स्थानमाश्रितस्तन्वा मोदते शरणागतः श्रीनारसिंहे त्वां प्रपन्नोऽस्मि शरणं देवदेवं जनार्दनम् इति
यः शरणं प्राप्तस्तं क्लेशादुद्धराम्यहम् अथ तुलस्याः सेवनं यथा स्कान्दे या दृष्टा निखिलाघसंघशमनी स्पृष्टा वपुः
पावनी रोगाणामभिवन्दिता निरसनी सिक्तान्तकत्रासिनी प्रत्यासत्तिविधायिनी भगवतः कृष्णस्य संरोपिता न्य
स्ता तच्चरणे विमुक्तिफलदा तस्यै तुलस्यै नमः तथा तत्रैव दृष्टा स्पृष्टा तथा ध्याता कीर्तिता नमिता श्रुता रोपि
ता सेविता नित्यं पूजिता तुलसी शुभा नवधा तुलसीं देवीं ये भजन्ति दिने दिने युगकोटिसहस्राणि ते वसन्ति
हरेर्गृहे २२ अथ शास्त्रस्य शास्त्रमंत्रसमाख्यातं यद्भक्तिप्रतिपादिकं वैष्णवानि तु शास्त्राणि ते शृण्वन्ति पठन्ति च
धन्यास्ते मानवा लोके तेषां कृष्णः प्रसीदति यथा स्कान्दे वैष्णवानि च शास्त्राणि येऽर्चयन्ति गृहे नराः सर्वपापवि
निर्मुक्ता भवन्ति सुरवन्दिताः तिष्ठते वैष्णवं शास्त्रं लिखितं यस्य मंदिरे तत्र नारायणो देवः स्वयं वसति नारद
श्रीभागवते सर्ववेदान्तसारं हि श्रीभागवतमिष्यते तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित् २४ अथ तदु

गयाः यथाआदिवाराहे मथुरांचपरित्यज्य योन्यत्रकुरुतेरतिम् मूढोभ्रमतिसंसारे मोहितोममयायया ब्रह्मांडे
त्रिलोकवर्तितीर्थानांसेवनाद्दुर्लभाहिया परानन्दमयीसिद्धिर्मथुरास्पर्शमात्रतःइति श्रुतास्मृताकीर्तिताचवां
छिताप्रेक्षितागता स्पृष्टाश्रितासेविताचमथुराभीष्टदानृणां इतिएतत्पुराणोक्तनविस्तारभियोच्यते अथवैष्णवा
नांयथापाद्मे आराधनानांसर्वेषांविष्णोराराधनंपरम् तस्मात्परतरंदेवितदीयानांसमर्चनम् तृतीये यत्से
वयाभगवतःकृष्टस्यस्यमधुद्विषः रतिरासोभवेत्तीव्रःपादयोर्व्यसनार्दनः स्कान्दे शंखचक्रांकिततनुःशिरसा
मंजरीधराः गोपीचंदनलिप्तांगोदृष्टश्चेत्तदघंकुतः प्रथमे येषांसंस्मरणात्पुंसांसद्यःशुद्ध्यन्तिवैगृहाः किंपुन
दर्शनस्पर्शपादशौचासनादिभिः आदिपुराणे येमेभक्तिजनःपार्थनमेभक्ताश्चतेजनाः मद्भक्तानांचयेभक्ता
ममभक्तास्तुतेनराःइति यावन्तिभगवद्भक्तेरंगानिकथितानिह प्रायस्तावन्तितद्भक्तभक्तेरपिबुधाविदुः अथयथावै
भवमहोत्सवः यथापाद्मे यःकरोतिमहीपालहरेर्गेहेमहोत्सवम् तस्यापिभवतेनित्यंहरिलोकेमहोत्सवः अ
थोर्जादरः यथापाद्मे यथादामोदरोभक्तवत्सलोविदितोजनैः तस्यायंतादृशोमासस्वल्पमप्युरुकारकः तत्रापिमा
माथुरेविशेषोयथातत्रैव भुक्तिंमुक्तिंहरिर्दद्यादर्चितोन्यत्रसेविनाम् भक्तिंतुनददात्येवयतोवश्यकरीहरेः सात्वं
जसाहरेर्भक्तिर्लभ्यतेकार्तिकेनरैः मथुरायांसकृदपिश्रीदामोदरसेवनात् अथश्रीजन्मदिनयात्रा यथाभविष्यो

ने यस्मिन्दिने प्रसूतेयं देवकीत्वां जनार्दन तद्दिनं ब्रूहि वैकुंठ कुर्मस्ते तत्र चोत्सवम् तेन सम्यक्प्रपन्नानां प्रसादं
कुरु केशव अथ श्रीमूर्तेरंघ्रिसेवने प्रीति यथा आदिपुराणे मम नाम सदाग्राही मम सेवाप्रियः सदा भक्ति
स्तस्मै प्रदातव्या न तु मुक्तिः कदाचन अथ श्रीभागवतास्वादो यथा प्रथमे निगमकल्पतरोर्गलितं फलं शुक
मुखादमृतद्रवसंयुताम् पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः द्वितीये च परिनिष्ठितो
पि नैर्गुण्य उत्तमश्लोकलीलया गृहीतचेता राजर्षे आख्यानं यदधीतवान् ४१ अथ सजातीयाशय स्निग्ध श्रीभक्त
संगो यथा प्रथमे तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ह
रिभक्तिसुधोदये च यस्य यत्संगतिः पुंसो मणिवत्स्यात्स तद्गुणः स्वकुलर्द्ध्यै ततो धीमान्स्वयूथ्यानेव संश्रये
त् अथ नामसंकीर्तनं यथा द्वितीये एतन्निर्विद्यमानानामिच्छतामकुतोभयम् योगिनां नृप निर्णीतं हरे
र्नामानुकीर्तनम् आदिपुराणे च गीत्वा च मम नामानि विचरेन्मम सन्निधौ इति ब्रवीमि ते सत्यं क्रीतोहं तव चा
र्जुन पाद्मे च येन जन्मसहस्राणि वासुदेवो निषेविताः तन्मुखे हरिनामानि सदा तिष्ठन्ति भारत यतोत्रैव
नामचिन्तामणिः कृष्णश्चैतन्यरसविग्रहः पूर्णः शुद्धो नित्यमुक्तोभिन्नत्वान्नामनामिनोरिति अतः श्रीकृष्ण
नामादि न भवेद्ग्राह्यमिन्द्रियैः सेवोन्मुखे हि जिह्वादौ स्वयमेव स्फुरत्यदः अथ श्रीमथुरामण्डले स्थितिः य

म०
र० मृ०
१२
12

थायाम्बे अन्येषु पुण्यतीर्थेषु मुक्तिरेव महाफलम् मुक्तेः प्रार्थ्या हरेर्भक्तिर्मथुरायां तु लभ्यते त्रिवर्गदा कामिनां य
मुमुक्षूणां तु मोक्षदा भक्तीच्छोर्भक्तिदा कस्तां मथुरां नाश्रयेद्बुधः अहो मधुपुरी धन्या वैकुण्ठाच्च गरीयसी दिनमे
कं निवासेन हरौ भक्तिः प्रजायते ऊर्जे दामोदरं तत्र वीर्यस्मिन् ब्रह्माद्यैर्हरेस्तु पंकके यत्र स्वल्पोपि संबन्धः सा ह्रियां भावजन्म
ने तत्र श्रीमूर्तिर्यथा स्मेरां भंगीत्रयपरिचितां साचिविस्तीर्णदृष्टिं वंशीन्यस्ताधरकिसलयामुज्ज्वलां चंद्रकेण गो
विन्दाख्यां हरितनुमितः केशितीर्थोपकंठे मा प्रेक्षिष्ठास्तव यदि सखे बन्धुसंगेस्ति रंगः श्रीभागवतं यथा शां
केनीतास्य पदिदधाम सकृन्द पद्यावलीनावगाल्कणोध्वनिपथिकतामानुपूर्व्या भवन्तः हंहो स्निग्धाः परमशुभदा
हेतु धर्मार्थकामान् पर्यन्तस्यावमयमसीमोत्तमपुमान् दिपन्ति रूपसंभक्तो यथा दृगम्भोभिर्धौतः पुलकपट
लीमंडिततनुस्खलन्नंतः स्फुलोदयदचिरप्युद्वेपथुमपि दशा कष्टा यावन्मम सपुरुषकोप्युपययौ न जाने
किं तावन्मति निहितं दृष्टेनाभिरमते नाम यथा यदवधि समश्रीता वैणिकेनानुगीता श्रुतिपथमचपात्रो ना
मगाथा प्रयाता अनवकलितसर्वेहन्तकामप्यवस्थां तदवधि दयदन्तर्मौनसंपाम्यतीव श्रीमथुरामंडलं य
था तटसविकृतकान्तिः पयामलायास्तदिन्याः स्फुरितनवकदंबालं विहूजह्हिरेफा निरवधिमथुरिमाणामंडि
तेयं कथं मे मनसिकमपि भावं काननश्रीस्तनोति अलौकिकपदार्थानामचिन्त्यशक्तिरीदृशी भावं तद्धिर

१२

षयंवापियासहैवप्रकाशयेत् केषांचित्कोविदंमानानांयत्तदृष्टंश्रूयतेफलं बहिर्मार्गविप्रहृष्टैस्तत्किंतन्मुख्यंफलंर
तिः स्मृतंभक्तिविज्ञानांभक्त्यंगत्वंनकर्मणाम् यथैकादशे तावत्कर्माणिकुर्वीतननिर्विद्येतयावता मत्कथा
श्रवणादौवाश्रद्धायावन्नजायते ज्ञानवैराग्ययोर्भक्तिप्रवेशायोपयोगिता ईषत्प्रथममेवेतिनांगत्वंउचितंत
योः यदुभेचित्तकाठिन्यहेतूप्रायःसतांमते सुकुमारस्वभावेयंभक्तिस्तद्धेतुरीरिता यथातत्रैव तस्मान्मद्भ
क्तियुक्तस्ययोगिनोवैमदात्मनः नज्ञानंनचवैराग्यंप्रायःश्रेयोभवेदिह किंतुज्ञानविरक्त्यादिसाध्यंभक्त्यैवसि
ध्यति यथातत्रैव यत्कर्मभिर्यत्तपसाज्ञानवैराग्यतश्चयत् योगेनदानधर्मेणश्रेयोभिरितरैरपि सर्वंमद्भक्तियो
गेनमद्भक्तोलभतेंजसा स्वर्गापवर्गंमद्धामकथंचिद्यदिवांछतीति रुचिमुद्वहतस्तत्रजनस्यभजनेहरेः वि
षयेषुगरिष्ठोपिरागःप्रायोनिलीयते अनासक्तस्यविषयान्यथार्हमुपयुंजतः निर्बंधःकृष्णसंबंधेयुक्तंवैराग्यमु
च्यते प्रापंचिकतयाबुद्ध्याहरिसंबंधिवस्तुनः मुमुक्षुभिःपरित्यागोवैराग्यंफल्गुकथ्यते प्रोक्तेनलक्षणेनैवभक्ते
रधिकृतस्यच अंगत्वेस्यनिरस्तेपिनित्याद्याखिलकर्मणां ज्ञानस्याध्यात्मिकस्यापिवैराग्यस्यचफल्गुनाः स्पष्टतार्थं
पुनरपितद्वेदंनिराकृतिं यत्तंशिष्यादिभिर्द्वारैर्याभक्तिरुपपाद्यते विदूरत्वादुत्तमताहान्यातस्याश्चनांगता वि
शेषणत्वमेवैषांसंश्रयत्यधिकारिणाम् विवेकादीन्यतोमेषामपिनांगत्वमुच्यते कृष्णोन्मुखंस्वयंयान्तियमाः

शौचादयःस्तथा इत्येषांचनवयुक्तस्याभक्त्यंगान्तरपातिता यथास्कान्दे एतेनह्यद्भुताव्याधतवाहिंसादयोगुणाः ह
रिभक्तौप्रवृत्तायेनतेस्युःपरतापिनः तत्रैव अन्तःशुद्धिर्बहिःशुद्धिस्तपःशान्त्यादयस्तथा अमीगुणाःप्रपद्यन्तेहरि
सेवाभिकामिनेमिति साभक्तिरेवमुख्यांगाश्रितानैकांगिकाथवा स्ववासनानुसारेणनिष्ठातस्सिद्धिकृद्भवेत् त
त्रैकांगिकायथाग्रन्थान्तरे श्रीविष्णोःश्रवणेपरीक्षिदभवद्वैयासकिःकीर्तने प्रह्लादःस्मरणेतदंघ्रिभजनेलक्ष्मी
पृथुःपूजने अक्रूरस्त्वभिवन्दनेकपिपतिर्दास्येथसख्येर्जुनः सर्वस्वात्मनिवेदनेबलिरभूत्कृष्णाप्तिरेषांपरम्
अनेकांगंयथा श्रीनवमे सवैमनःकृष्णपदारविंदयोर्वचांसिवैकुंठगुणानुवर्णने करौहरेर्मन्दिरमार्जना
दिषुश्रुतिंचकाराच्युतसत्कथोदये मुकुन्दलिंगालयदर्शनेदृशौ तद्भृत्यगात्रस्पर्शेंगसंगमम् घ्राणंचतत्पा
दसरोजसौरभेश्रीमत्तुलस्यारसनांतदर्पिते पादौहरेःक्षेत्रपदानुसर्पणेशिरोहृषीकेशपदाभिवन्दने कामं
चदास्येनतुकामकाम्यया यथोत्तमश्लोकजनाश्रयारतिः शास्त्रोक्तयाप्रबलयातत्तन्मर्यादयान्विता वैधीभ
क्तिरियंकैश्चित्मर्यादामार्गउच्यते अथरागानुरागा विराजन्तीमभिव्यक्तंव्रजवासिजनादिषु रागात्मिकाम
नुसृतायासारागानुगोच्यते रागानुरागाविवेकार्थमादौरागात्मिकोच्यते इष्टेस्वारसिकीरागःपरमाविष्टता
भवेत् तन्मयीयाभवेद्भक्तिःसात्ररागात्मिकोदिता साकामरूपासंबन्धरूपाचेतिभवेद्विधा तथाहिसप्तमे

कामाद्द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः गोप्यः कामाद्भयात्कंसो द्वे
षाच्चैद्यादयो नृपाः संबंधाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो इति अत्र कल्पाविपर्यासाज्ञीति द्वेषौ परावृत्तौ स्ने
हसंबंधाविवाविचित्वाद्वैधिभक्त्यनुवर्त्तिता किंवा प्रेमाभिधायित्वानोपयोगी तत्रसाधने भक्त्या वयमिति व्यक्तं वैधीभ
क्तिरुदाहृता यद्गोपीनां प्रियाणां च प्राप्यमेकमिवोदितं तत्तु ब्रह्मकृष्णयोरैक्यात्किरणार्कोपमाज्जुषोः ब्रह्मा
ण्येवलयं यांति प्रायेणारिपवो हरेः केचित्प्राप्यापि सारूप्याभासं मज्जन्ति तत्सुखे तथा च ब्रह्माण्डपुराणे सिद्धलो
कस्तु तमसः पारे यत्र वसन्ति हि सिद्धा ब्रह्मसुखे मग्ना दैत्याश्च हरिणा हता इति रागबंधेन केनापि तं भजन्तो व्र
जन्त्यमी अंघ्रिपद्मसुधां प्रेमरूपां तस्य प्रिया जनाः तथा हि श्रीदशमे निभृतमरुन्मनोक्षदृढयोगयुजो
हृदि यन्मुनय उपासते तदरयोपि ययुः स्मरणात् स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियो वयमपि ते स
माः समदृशोंघ्रिसरोजसुधा इति तत्र कामरूपा सा कामरूपा संभोगतृष्णां यां नयति स्वतां यदस्यां कृष्ण
सौख्यार्थमेव केवलमुद्यमः इयं तु व्रजदेवीषु सुप्रसिद्धा विराजते आसां प्रेमविशेषोयं प्राप्तः कामपि माधु
रीम् तत्क्रीडानिदानत्वात्काम इत्युच्यते बुधैः तथा च तंत्रे प्रेमैव गोपरामाणां काम इत्यगमत्प्रथामिति इत्यु
द्धवादयोप्येतं वांछन्ति भगवत्प्रियाः कामप्राया रतिः किंतु कुब्जायामेव संमता सम्बन्धरूपा संबन्धरूपा गो

भ॰
र॰ सि॰
२४
14

विदे पित्रत्वादिभ्भ्यमानिता अत्रोपलक्षणतयानात्रसम्यग्विचारितेति रागात्मिकायाद्वैविध्याद्विदारागानुगावसा
कामानुगा च सम्बन्धानुगा चेति निगद्यते अत्राधिकारी रागात्मिकैकनिष्ठा ये व्रजवासिजनादयः तेषां भावाप्तये
लुब्धो भवेदत्राधिकारवान् तत्तद्भावादिमाधुर्ये श्रुते धीर्यदपेक्षते कृष्णं स्मरंजनं चास्य प्रेष्ठं निजसमीहितम् तत्त
त्कथारतश्चासौ कुर्याद्वासं व्रजे सदा सेवा साधकरूपेण सिद्धरूपेण चात्र हि तद्भावलिप्सुना कार्या व्रजलोकानु।
सारतः श्रवणोत्कीर्तनादीनि वैधभक्त्युदितानि च यान्यंगानि च तान्यत्र विज्ञेयानि मनीषिभिः तत्र कामानुगा कामा
नुगा भवेत्तृष्णा कामरूपानुगामिनी संभोगेच्छामयी तत्तद्भावेच्छात्मेति सा द्विधा केलितात्पर्यवत्येव संभोगे
च्छामयी भवेत् तद्भावेच्छात्मिका तासां भावमाधुर्यकामिता श्रीमूर्तेर्माधुरीं प्रेक्ष्य तत्तल्लीलां निशम्य वा तद्भावा
कांक्षिणो ये स्युस्तेषु साधनतानयोः पुराणे श्रूयते पाद्मे पुंसामपि भवेदियं यथा पुरा महर्षयः सर्वे दण्डकारण्य
वासिनः दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन्सुविग्रहम् ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले हरिं संप्राप्य कामे
न ततो मुक्ता भवार्णवादिति रिरंसां सुष्ठु कुर्वन्यो विधिमार्गेण सेवते केवलेनैव स तदा महिषीत्वमियात्पुरे तथा
च महाकौर्मे अग्निपुत्रा महात्मानास्तपसा स्त्रीत्वमापिरे भर्तारं च जगद्योनिं वासुदेवमजं विभुमिति अथ सम्बा
नुगा सा संबन्धानुगा भक्तिः प्रोच्यते सद्भिरात्मनि यापित्रत्वादिसम्बन्धमननारोपणात्मिका लुब्धैर्वात्सल्यसा।

२४

त्वदो भक्तिः कार्यात्र साधकैः व्रजेन्द्रसुबलादीनां भावचेष्टितमुद्रया तथा हि स्मर्यते शास्त्रे कश्चित्कुरु
पुरीं स्थितः नन्दसूनोरधिष्ठानं तत्र पुत्रतया भजेत् नारदस्योपदेशेन सिद्धोऽभूद्वृद्धवार्द्धकिः अतएव नारा
यणव्यूहस्तवे पतिपुत्रसुहृद्भ्रातृपितृवन्मित्रवद्धरिम् ये ध्यायन्ति सदोद्युक्तास्तेभ्योऽपीह नमो नमः इति कृ-
ष्णतद्भक्तकारुण्यमात्रलाभैकहेतुका पुष्टिमार्गतया कैश्चिदियं रागानुगोच्यते इति श्रीभक्तिरसामृत
सिन्धौ पूर्वविभागे साधनभक्तिलहरी ॥ ॥ अथ भावः शुद्धसत्वविशेषात्मा प्रेमसूर्यांशुसाम्यभा
क् रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते १ तथा हि तन्त्रे प्रेम्णस्तु प्रथमावस्था भाव इत्यभिधीयते सात्
त्विकाः स्वल्पमात्राः स्युरत्राश्रुपुलकादयः यथा पद्मपुराणे ध्यायं ध्यायं भगवतः पदाम्बुजयुगं तदा ईषद्वि
क्रियमाणात्मा सार्द्रदृष्टिरभूदसाविति २ आविर्भूय मनोवृत्तौ व्रजन्ती तत्स्वरूपताम् स्वयंप्रकाशरूपापि
भासमाना प्रकाश्यवत् वस्तुतः स्वयमास्वादस्वरूपैव रतिस्त्वसौ कृष्णादिकर्मकास्वादहेतुत्वं प्रतिपद्यते
साधनाभिनिवेशेन कृष्णतद्भक्तयोस्तथा प्रसादेनातिधन्यानां भावो द्वेधाभिजायते आद्यस्तु प्रायिकस्तत्र द्वि
तीयो विरलोदयः तत्र साधनाभिनिवेशजः वैधीरागानुगामार्गभेदेन परिकीर्तितः द्विविधः खलु भावोऽत्र
साधनाभिनिवेशजः साधनाभिनिवेशस्तु तत्र निष्पादयन् रुचिम् हरावासक्तिमुत्पाद्य रतिं संजनयत्यसौ त

भ॰
र॰ सि॰
१५
15

त्रयोयथाप्रथमे सतान्तुदंककस्कथाः प्रगायतामनुग्रहेणाश्रवणामनोहराः ताः श्रद्दधामेनुपदंविष्णुणुत
प्रियश्रवसंगममाभवद्रतिर्विति रत्यात्कभावरवात्रनत्प्रेमाभिधीयते ममभक्तिप्रवृत्तेतिवल्पतेमयदश्रतः
यथा इत्थंशरत्प्रावृषिकावृतू हरेर्विशृण्वतोमेनुपदंयशोमलम् सत्कीर्तिमानेमुनिभिर्महात्मभिः भक्तिप्रवृत्ता
तात्मरजस्तमोपहा तृतीयेच सतांप्रसंगात्ममवीर्यसंविदोभवन्तिहृत्कर्णरसायनःकथा तज्जोषणादाशु
पवर्गवर्त्मनिश्रद्धारतिर्भक्तिरनुक्रमिष्यति अग्नेर्विनाद्यासेवद्वयोरनुरतिभावयो समानार्थतयाव्येतद्द्वय
मैकेनलक्षितम् द्वितीयोयथापाद्मे इत्थंमनोरथंबालाकुर्वन्त्युत्पततत्स्वका हरिप्रीत्यांचसर्वांतांरात्रिमेवात्य
वाहयत अथकृष्णतद्भक्तप्रसादजः ९ साधनेनविनायस्तुसहसैवाभिजायते सभावकृष्णतद्भक्तप्रसादज
दीर्यते तत्रकृष्णप्रसादजः प्रसादोवाचिकालोकदानहार्दादयोहरेः तत्रवाचिकप्रसादजोयथा श्रीनारदीये
सर्वमंगलमूर्धन्यापूर्णानन्दमयीसदा द्विजेन्द्रतवमय्यस्तुभक्तिरव्यभिचारिणी आलोकदानजोयथास्का
न्दे अदृष्टपूर्वमालोक्यकृष्णंजांगलवासिना विक्लिद्यदंतरात्मानोद्दधंनाङ्कुष्ठमीषिरे हार्दः प्रसादआ
न्तरोयत्सात्तद्धार्दश्चनिकथ्यते यथाशुकसंहितायां महाभागवतोजाताःप्रेतस्त्वेवादरायणेः विनोपायेन
येयाम्नहिस्मभक्तिर्विहोद्रिता यथाम…… प्रसादजः यथासममस्कन्दे गुणोरलमसंबन्धेयेमाहात्म्यतस्य

न्यते वासुदेवे भगवति यस्य नैसर्गिकी रतिरिति नारदस्य प्रसादेन प्रह्लादस्य भवा मता निसर्गसेवतेनात्र
रतिर्नैसर्गिकी मता स्कान्दे च अहो धन्योसि देवर्षे कृपया यस्य तत्क्षणात् नीचोप्युत्पुलको लेभे लुब्धको रतिमच्यु
ते इति भक्तानां भेदतस्सेयं रतिः पंचविधा मता अग्रे विविच्यैव वक्तव्या तेन नात्र प्रपंच्यते १० क्षान्तिरव्यर्थकालत्वं वि
रक्तिर्मानशून्यता आशाबन्धः समुत्कण्ठा नामगाने सदा रुचिः आसक्तिस्तद्गुणाख्याने प्रीतिस्तद्वसतिस्थले इ
त्याद्ययोनुभावास्युर्जातभावांकुरे जने तत्र क्षान्तिः क्षोभहेतावपि प्राप्ते क्षान्तिरक्षुभितात्मता यथा प्रथमे ११
तं मोपयातं प्रतियन्तु विप्रा गंगा च देवी धृतचित्तमीशे द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं गायत विष्
णुगाथाः अथाव्यर्थकालत्वं यथा भक्तिरसोदये वाग्भिस्स्तुवन्तो मनसा स्मरन्तस्तन्वा नमन्तोप्यनिशं न तृप्ताः
भक्तास्स्रवन्नेत्रजलाः समग्रमायुर्हरेरेव समर्पयन्ति अथ विरक्तिः १२ विरक्तिरिन्द्रियार्थानां स्यादरोचकता स्व
यं यथा पंचमे यो दुस्त्यजान्दारसुतान्सुहृद्राज्यं हृदिस्पृशः जहौ युवैव मलवदुत्तमश्लोकलालसः अथ मान
शून्यता तत्कृष्टत्वेपि मानत्वं कथिता मानशून्यता यथा पाद्मे १४ हरौ रतिं वहन्नेष नरेन्द्राणां शिखामणिः भि
क्षामटन्नरिपुरे श्वपाकमपि वन्दते अथाशाबन्धः आशाबन्धो भगवतः प्राप्तिसंभावना दृढा यथा प्रभुपा
दानां १५ न प्रेमा श्रवणादिभक्तिरपि वा योगोथवा वैष्णवो ज्ञानं वा शुभकर्म वा कियदहो सज्जातिरप्यास्त्र वा ही

म०
र० सु०
१६
16

नार्योथिकमाथकेत्वयितथाप्युच्छेयमृलामती हे गोपीजनवल्लभव्यथयतो हा हा मदाशैव मां अथ समक्क
एव समस्तकंठनिजाभीष्टलाभाय ग्रहलब्धता यथा कर्णामृते आनम्रामसितभ्रुवोरुपचितामक्षीणपक्ष्मांकुरे
ष्वालोलामनुरागिणोर्नयनयोरार्द्रांमृदौजल्पिते आताम्रामधरामृतेमदकलामम्लानवंशीस्वनेष्वाशास्तेम
मलोचनंव्रजपतेर्मूर्तिंजगन्मोहिनीम् अथ नामगाने रुचिर्यथा वेदनवि`` मरलस्यन्दिहृदीन्दीवरादिगोविं
द तवमधुरस्वरकंठी गायतिनामावलिंबाला तद्गुणाख्याने आसक्तिर्यथा कर्णामृते १६ माधुर्यादपिमधु
रंमन्मथतातस्यकिमपिकिशोरम् चापल्यादपिचपलंचेतोवतहरतिकिंकर्मः तद्वसतिस्थले प्रीतिर्यथापा
द्यावल्यां अत्रासीत्किलनन्दनस्यद्वाशकटस्यात्राभवत्तंजने बन्धच्छेदकरोपिदामभिरभूद्बद्धोयदामोदराः
इत्थंमाथुरवृद्धवक्त्रविगलत्पीयूषधारांपिबन्नानन्दाश्रुधराः कदामधुपुरींधन्यश्चरिष्याम्यहम् अपिच १८ व
न्नेसम्पत्तिवान्तलेत्नेरतिलक्ष्मणाम् स्वमस्तुप्रभृतेनाचेन्नवैदेषारभिन्नाहि १९ विमुक्ताखिलतर्षैर्याम्
क्तैरपिविमृग्यते याकृष्णेनातिगोप्याशुभजद्भ्योपिनदीयते साभक्तिर्मुक्तिकामेनशुद्धाभक्तिमकुर्वताम्
हृदयेसंभवत्येषांकथंभागवतीरतिः किंत्वबालश्चमत्कारकारीतच्छ्रीकृष्णवीतया अविज्ञेन स्वबोधाय यंरत्याद्या
सप्रकीर्तितः प्रतिबिम्बंतथाछायारत्याद्याभासोहितामतः तत्रप्रतिबिंबः अथ यमाभीष्टनिवोढी रतिलदिणाल

२२

दितः भोगापवर्गसौख्यंव्यंजकः प्रतिबिंबकाः देवात्मभक्तसंगेन कीर्तनाद्यनुसारिणां प्रायः प्रसन्नम
नसां भोगमोक्षाविरागिणां केषांचिद्धृदि भावेन्दोः प्रतिबिंबउदंचति तद्भक्तहृन्नभस्थस्य तत्संसर्गप्रभाव
तः अथ छाया क्षुद्राकौतूहलमयी चंचला दुःखहारिणी रतेश्छाया भवेत्किंचित्तत्सादृश्यावलंबिनी
हरिप्रियक्रियाकालदेशपात्रादिसंगमात् अप्यानुषंगिकादेषा क्वचिदज्ञेष्वपीक्षते किंत्वभाग्यं विनाना
नासौ भावच्छायाप्युदंचति यदभ्युदयतः क्षेमं तत्र स्यादुत्तरोत्तरम् हरिप्रियजनस्यैव प्रसादभरलाभतः
भावाभासोपि सहसा भावत्वमुपगच्छति तस्मिन्नेवापराधेन भावाभासोप्यनुत्तमा क्रमेण क्षयमयाति
खस्थः पूर्णशशी यथा किंच २३ भावोपि भावमायाति कृष्णप्रेष्ठापराधतः आभासतां च शनकैर्न्यूनजा
तीयतामपि गाढात्संगात्समायाति रूढस्तोप्रतिष्ठते आभासताम् असौ किंवा भजनीयेशभावतां २४
अत एव क्वचित्तेषु नव्यभक्तेषु दृश्यते क्षणमीश्वरभावोयं नृत्यादौ मुक्तिपक्षगः २५ साधनेच्छां विना यस्मि
न्नकस्माद्भाव ईक्षते विघ्नस्थगितमत्रोह्यं प्राग्भवीयं सुसाधनं लोकोत्तरचमत्कारकारकः सर्वशक्तिदः
यः प्रथीयान्भवेद्भावः स तु कृष्णप्रसादजः जने चेज्जातभावेपि वैगुण्यमिव दृश्यते कार्या तथापि नासूया
कृतार्थाः सर्वथैव सा यथा नारसिंहे २६ भगवति च हरावनन्यचेता भृशमलिनोपि विराजते मनुष्यः न

भ॰
र॰ सि॰
१२
17

द्विशशाकलस्पृक्षाविकृदा विनिमिरप्रदा भवतामत्ययेति चन्द्र इति ११ रतिरनिशानिसर्गोष्मप्रबलतरानन्दपूर
इवैव ऊष्माणमपि वमन्ती सुधांशुकोटेरपि स्वाद्वी ॥ इति श्रीभक्तिरसामृतसिन्धौ पूर्वविभागे भक्तिलहरी
॥ ॥ अथ प्रेमा सम्यङ्मसृणितस्वान्तो ममत्वातिशयाङ्कितः भावः स एव सान्द्रात्मा बुधैः प्रेमा निग
द्यते १ अथ पञ्चरात्रे अनन्यममता विष्णौ ममता प्रेमसंगता भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैः ममता
न्यममत्वेन वर्जितेन्यत्र योजना भावोत्थोतिप्रसादोत्थः श्रीहरेरिति स द्विधा तत्र भावोत्थः भाव एवान्तरंगाना
मंगानामनुसेवया आरूढः परमोत्कर्षं भावोत्थः परिकीर्तितः तत्र वैधभावोत्थो यथा एकादशे ५ एवं
व्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लो
कबाह्यः रागानुगीयभावोत्थो यथा पाद्मे न पतिं कामयेत् किंचिद् ब्रह्मचर्यस्थिता सदा तमेव मूर्तिं ध्या
यन्ती चन्द्रकान्तिवरानने श्रीकृष्णगाथा गायन्ती रोमांचोभेदलक्षणा अस्मिन्मन्वन्तरे स्निग्धा श्रीकृष्ण
प्रियवार्तया अथातिप्रसादोत्थः ६ हरेरतिप्रसादोयं संगदानादिरात्मनाः यथैकादशे तेनाधीतश्रु
तिगणा नोपासितमहत्तमा अव्रतातप्ततपसो मत्संगान्मामुपागता इति ८ महात्म्यज्ञानयुक्तश्च के
वलश्चेति स द्विधा तत्राद्यो यथा पंचरात्रे माहात्म्यज्ञानयुक्तस्तु सुदृढः सर्वतोधिकः स्नेहो भक्तिरिति प्रो

क्तोत्कण्ठ्यासान्त्वादिनायथा केवलोयथातत्रैव मनोगतिरविच्छिन्ना हरौप्रेमपरिप्लुता अभिसन्धिविनिर्मु
क्ताभक्तिर्विष्णुवशंकरी १० महिमज्ञानयुक्तःस्याद्विधिमार्गानुसारिणाम् रागानुगाश्रितानांतुप्रायशःके
वलोभवेत् ११ आदौश्रद्धाततःसाधुसंगोथभजनक्रिया ततोनर्थनिवृत्तिःस्यात्ततोनिष्ठारुचिस्ततः अथा
सक्तिस्ततोभावस्ततःप्रेमाभ्युदंचति साधकानामयंप्रेम्णःप्रादुर्भावेभवेत्क्रमः धन्यस्यायंनवप्रेमायस्यो
न्मीलतिचेतसि अन्तर्वाणिभिरप्यस्यमुद्रासुष्ठुसुदुर्गमा १३ अतएवनारायणपंचरात्रे भावोन्मत्तोहरे
किंचिन्नवेदसुखमात्मना दुःखंचेतिमहेशानिपरमानन्दमाप्लुतः प्रेम्णएवविलासत्वाद्वैरल्यात्साध
केष्वपि अत्रप्रेम्णःपरैर्भेदाविविच्यनहिशंसिता श्रीमत्प्रभुपदांभोजैःसर्वभागवतामृते व्यक्तीकृ
तास्तिसुष्ठ्वापिभक्तिसिद्धान्तमाधुरी ॥ इतिश्रीप्रेमभक्तिलहरी ४ ॥ गोपालरूपशोभांदधदपिरघु
नाथभावविस्तारी तुष्यतुसनातनात्मा प्रथमविभागस्वयाम्बुनिधेः ॥ इतिश्रीभक्तिरसामृतसिन्धौरसा
पयोनिधेःसाधिभावोपपादनोनामपूर्वोविभागः ॥ प्रबलमनन्याश्रयिणानिषेवितसहजरूपेण अग्रज
घनोमथुरायांसदासनातनतनुर्जयति रसामृतस्यभागेस्मिन्द्वितीयेदक्षिणाभिधे सामान्याभगवद्भक्ति
रसस्तावदुदीर्यते अस्यपंचलहर्यःस्युर्विभावाख्याग्रिमामता द्वितीयात्वनुभावाख्यातृतीयासात्त्विकाभि

भ॰
र॰ सि॰
१८
18

या व्यभिचार्यभिधास्तुर्यास्थायिसंज्ञास्तु पंचमी अथास्याः केशवरतेर्लक्षिताया निगद्यते सामग्रीपरिपोषेण परमा रस
रूपता १ विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः स्वाद्यात्वं हृदि भक्तानामानीता श्रवणादिभिः एषा कृष्णर
तिस्थायी भावो भक्तिरसो भवेत् २ प्राक्तन्याधुनिकी चास्ति यस्य सद्भक्तिवासना एष भक्तिरसास्वादस्तस्यैव हृदि जाय
ते ३ भक्तिनिर्धूतदोषाणां प्रसन्नोज्ज्वलचेतसां श्रीभागवतरक्तानां रसिकासंगरंगिणां ४ जीवनीभूतगोविंदपा
दभक्तिसुखश्रियम् प्रेमान्तरंगभूतानि कृत्यान्येवानुतिष्ठताम् भक्तानां हृदि राजन्ती संस्कारयुगलोज्ज्वला र
तिरानन्दरूपैव नीयमाना तु रस्यतां कृष्णादिभिर्विभावाद्यैर्गतैरनुभवाध्वनि प्रौढानन्दचमत्कारकाष्ठामापद्य
ते पराम् किंतु प्रेमा विभावाद्यैः स्वल्पैर्नीतोप्यणीयसीं विभावनाद्यवस्थां तु सद्य आस्वाद्यतां व्रजेत् तत्र वि
भावाद्यसामान्यलक्षणम् ये कृष्णभक्तमुरलीनादाद्या हेतवो रतेः कार्यभूताः स्मिताद्याश्च तथाष्टौ तत्त्वताद
यः निर्वेदाद्याः सहायाश्च ते ज्ञेयाः रसभावने विभावा अनुभावाश्च सात्विका व्यभिचारिणः तत्र विभावः ५
तत्र ज्ञेया विभावास्तु रत्यास्वादनहेतवः ते द्विधालम्बना एके तथैवोद्दीपनाः परे तदुक्तमग्निपुराणे विभा
व्यते हि रत्यादिर्यत्र येन विभाव्यते विभावो नाम स द्वेधालंबनोद्दीपनात्मका तत्रलम्बनाः ६ कृष्णश्च कृष्णभ
क्ताश्च बुधैरालम्बना मताः रत्यादेर्विषयत्वेन तथाधारतयापि च तत्र कृष्णः नायकानां शिरोरत्नं कृष्णस्तु भग

वाङ्मयं यत्र नित्यतया सर्वे विराजन्ते महागुणा सोऽन्यरूपस्वरूपाभ्यामस्मिन्नालम्बनो मतः तत्रान्यरूपेण
